International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 37-39
© 2026 IJMH
www.themultijournal.com
Received: 22-04-2026
Accepted: 04-05-2026
Publish : 06-05-2026

**सुकान्त कुमार बारिक**
(शोधच्छात्रः),
व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**Correspondence:**
**सुकान्त कुमार बारिक**
(शोधच्छात्रः),
व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

# पाणिनीयदिशा ऋजुप्राज्ञव्याकरणस्य "अदादेरवो लुक्" इति सूत्रविमर्शः

**सुकान्त कुमार बारिक**

## ➢ प्रस्तावना -

इह खलु विचित्रगतिमति संसारे नुः सकलव्यवहारस्य हेतुश्शब्द एव। तद्वारेणैव ना प्रेषयति मनोगतभावानन्यं प्रति व्यवहरति च । तदर्थमेव प्रवृत्तं शास्त्रं शब्दशास्त्रम्।तथा हि "व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा उपशब्देभ्यः" इति व्युत्पादयन्तश्शास्त्रमर्मज्ञा इदमेव शास्त्रं व्याकरणमित्यपरनाम्ना ब्रुवन्तः साधुशब्दानाम् अनुशासनमेव शास्त्रस्यास्य परमं प्रयोजनम्, तस्य फलं तु "एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामयुग्भवति" इति महाभाष्यकृदुक्तिरिति सङ्गिरन्ते । शास्त्रस्यास्य महन्महत्त्वं वर्णयन् हरिमहाशयोऽप्याह यथा-

**तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥**[1]

**"प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्।प्रधाने कृतो यत्नः फलवान् भवति"**[2] । मुखं व्याकरणं स्मृतम् । परमपूज्यः महर्षिपाणिनिः शब्दशास्त्रकुलगुरुतां भजते । अनेन लोकवेदोभयमार्गेण सञ्चरमाणस्तत्र पाणिनिमुनिरक्षरसमान्म्नायादारभ्य शब्दसिद्धिप्रतिपादनपरं सूत्रेषूपनिवद्धं विलक्षणं तत्र प्रणिनाय । तैः सूत्रैः अष्टभिरध्यायैर्गुम्फितत्वादष्टाध्यायी इति नाम्ना व्यवहरन्ति। भगवतः पाणिनेः प्राक् कोऽप्याचार्यस्तस्मिन् पथि न सञ्चरितवान् । इदमेव पाणिनिव्याकरणस्य व्याकरणान्तरेभ्यो वैशिष्ठ्यम् । तदाह पराशरपुराणे –

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।**
**सर्वोपकारं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चिदपि ॥** इति

भगवतः पाणिनेः स्वोपज्ञत्वविषये नागनाथस्य पतञ्जलेरियमुक्तिः सन्ततं पर्याप्तैव । तेन चोक्तम् -

सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यादिति । भगवता पाणिनिनाष्टाध्यायां पूर्वाचार्याणां स्मरणञ्चाकारि । यथा - सम्बुद्धौ शाकल्यस्येतावनार्षे (1/1/16), तृषिमृषिकृशे काश्यपस्य (1/2/25) , लङः शाकटायनस्यैव (3/4/111) , गिरेश्च सेनकस्य (5/4/112) , वा सुप्यापिशलेः (6/1/92) , अवङ् स्फोटायनस्य (6/1/123) , ई इ चाक्रवर्मणस्य (6/3/130) , इको ह्रस्वोऽङ्यो गालवस्य (6/3/61), ऋतो भारद्वाजस्य (7/2/63), अतो गार्ग्यस्य (8/3/20) ।

भगवतः पाणिनेः परवर्तिनि समये कानिचन व्याकरणतन्त्राणि व्यचलन् , यानि सर्वथा न मौलिकान्यापि तु पाणिन्यनुसारिण्येव । अमीषु व्याकरणतन्त्रेषु सप्तदश-शताब्द्यां प्रणीतम् - ऋजुप्राज्ञव्याकरणम्। विशेषतया पाणिनीयव्याकरणस्य प्रभावः ऋजुप्राज्ञव्याकरणे दरीदृश्यते। यतो हि कानिचन रूपाणि पाणिनीयाष्टाध्यायीग्रन्थादुद्धृतानि। अपि च केचन धात्वनुबन्धाः पाणिनीय-धातुपाठसदृशाः। तथैव केचन दृष्टान्ताः सिद्धहेमचन्द्रव्याकरणात्स्वीकृताः। अपि च सूत्रविहिताः प्रत्यया अधिकतया सिद्धहेमचन्द्रसूत्रविहितप्रत्ययसदृशा एव। एवमेव पाणिनीयव्याकरणे धात्वधिकारे सार्वधातुकलकार आर्धधातुकलकार इति सञ्ज्ञाद्वयं वर्त्तते तद्वदत्रापि चतुष्क-षट्कभेदतया सञ्ज्ञाद्वयम् । अपि च पाणिनीयव्याकरणेऽसिद्धत्वविचारः सूत्रेषु मुख्यतया दृष्टः (पूर्वत्रासिद्धम् पा.8/2/1), तमेवासिद्धत्वविचारमनुसरतीह। अत एवानुमातुं शक्यतेऽनयोर्द्वयोर्व्याकरणयोरनुकरणम् ऋजुप्राज्ञे व्याकरणे वर्त्तते ।

शास्त्रसंरक्षणाय इन्द्रचन्द्रादयो बहवो दैवीभावा महापुरुषा भूमावतरिष्ट। तेष्वन्यतमो विद्यत उपाध्यायश्रीसहजकीर्तिगणिः।

➢ **कृतिपरिचयः -**

उपाध्यायश्रीसहजकीर्तिगणिविरचिता पञ्चचत्वरिंशदुत्तरद्विशताधिकैकसहस्रसूत्रपरिमिता (1245) व्याकरणसम्बद्धेयं कृतिः "ऋजुप्राज्ञव्याकरणम्" इति। गन्थेऽस्मिन् विभागत्रयं विद्यतेऽधिकारमाश्रित्य। ते च शब्दाधिकारः, धात्वधिकारः,कृदन्ताधिकारश्चेति।

**इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**
**पाणिन्यमरजैनेन्द्राजयन्त्यष्टदिशाब्दिकाः॥ १॥**

तत्र " दशगणी " इत्याख्यस्य धात्वधिकारस्यान्तर्गतेऽदादिगणस्य " अदादेरवो लुक् " इत्यादिमं सूत्रमुररीकृत्य श्रीपाणिनिदिशा यथामति व्याख्यास्यामीह।

❖ **"अदादेरवो लुक्"[3] (788) इत्यस्य सूत्रस्य विमर्शः-**

ऋजुप्राज्ञव्याकरणस्य अदादिगणस्य प्रारम्भे सूत्रस्यास्यान्वाख्यानावसरे श्रीमत्खरतरगच्छीयवाचनाचार्यश्रीरत्नहर्षश्रीहेमनन्दनगणीन्द्रशिष्यफलार्द्धिपार्श्वनाथप्रसादविहितसाङ्गश्रीशब्दार्णवमहाव्याकरणश्रीसहजकीर्त्तिगणिना मनोरमावृत्ताविदमुच्यते - अस्माद् अस्य लुभ्यवति। कच्त्वम्। उदाहरणानि - अत्ति, अत्तः, अहन्ति। अद्यात्। अत्तु, अत्ताम् एवं रीत्या रुपाणि। अदादेः इति षष्ठ्यन्तं पदम्, अविति प्रथमान्तं पदम्, लुगिति प्रथमान्तं पदञ्च। त्रिपदात्मकं सूत्रमिदम्। अदादेः = अद् आदिर्यस्य सः, तस्येति बहुव्रीहिसमासः।

• **अत्ति –**

"अदँ भक्षणे " इत्यस्माददादिगणधातोः "धातोः" इति सूत्राधिकारात् "भ्वादयः"इति सूत्रेण धातुसञ्ज्ञायां "तत्र वर्तमाने तिव्-तस्-अन्ति-सिव्-थस्-थ-मिव्-वस्-मस्-ते-आते-अन्ते-सै(से)-आथे-ध्वे-ए-वहे-महे (622)" इति सूत्रेण वर्त्तमानार्थे ऐते प्रत्यया विधीयन्ते तस्मात् " शेषात्कर्त्तरि परस्मैपदम् "इति सूत्रेण परस्मैपदे " त्रिकं त्रिकं प्रथमध्यमोत्तमम्" इति सूत्रेण प्रथममध्यमोत्तमसञ्ज्ञा, ततः प्रथमपुरुषे एकवचने तिव् प्रत्यये " वर्तमानाद्यवादि चतुष्कम्" इति सूत्रेण चतुष्कसञ्ज्ञायाम् "अव् चतुष्के" इति सूत्रेण अव्विकरणप्रत्यये- ( अद्+ अव्+ति) इति स्थिते "अदादेरवो लुक्" इति सूत्रेण अव्विकरणप्रत्ययस्य लुकि (अद् + ति ) इति जाते कच्त्वे "अत्ति" इतीष्टं रूपं सिद्धति। एवं रीत्या अत्तः अदन्ति च प्रथमपुरुषद्विवचने बहुवचने च रुपे सिद्ध्यतः। अत्तु, अत्ताम् इत्याद्युदाहरणेषु च "अदादेरवो लुक्" इति सूत्रेण अव् इत्यस्य लुग्भवति।

ग्रन्थस्यास्य टीकाटीप्पण्यादीनामधुनाप्यनुपलब्धत्वात्सूत्रस्य स्पष्टप्रतीत्यर्थं पाणिनीयं परमावश्यकम्। अतः पाणिनीयदिशा सूत्रमिदं विमृश्यते - "अदादेरवो लुक्" इति सूत्रं भगवतः पाणिनेः "अदिप्रभृतिभ्यः शपः (२.४.७२)" इति सूत्रस्यानुकरण मेव, अतः पर्यालोचनेन ऋजुप्राज्ञव्याकरणस्थसूत्रस्य सम्यगवबोधो भवति।

• **"अदिप्रभृतिभ्यः शपः[4]" इति सूत्रस्यार्थः –**

अदिप्रभृतिभ्य: इति पञ्चम्यन्तं पदम्, शपः इति षष्ठ्यन्तं पदञ्च। द्विपदात्मकं सूत्रमिदम्। 'लुक्' इति पदमनुवर्तते। अदिप्रभृतिभ्य उत्तरस्य शापो लुग्भवति इति[5]। पाणिनीये व्याकरणे कर्त्तरि शप्[6] इति सूत्रेण स्वार्वधातुके कर्त्तरि प्रत्यये परे धातोः परः औत्सर्गिकतया 'शप्' इति विकरणप्रत्ययो विधीयते। अदिप्रभृतिभ्यः शपः इति सूत्रेण विहितस्य शपो लुग्भवति।

• **ज्ञातव्यो विषयः -**

१.तिङ्शित्सार्वधातुकम् (3/4/13) इति सूत्रेण तिङ् प्रत्ययाः शित्प्रत्ययाश्च सार्वधातुकसञ्ज्ञां लभन्ते।

२.लुक् इति प्रत्ययलोपस्य किञ्चन विशिष्टं नाम। अस्मिन्विषये प्रत्ययस्य लुक्श्लुलुपः (1/ 1/61) इत्यत्र विस्तारेण व्याख्यातमस्ति।

• **शास्त्रीयविषयः –**

गरुडपुराणे "न विश्वसेत् अविश्वस्तम्' इति प्रयोग: संलक्ष्यते। अत्र अदादिगणस्य 'श्वस्' धातोः विधिलिङ्लकारे ' विश्वसेत्' इति रूपम्। तत्प्रयुक्तमस्ति।

वस्तुतस्तु - ( वि+श्वस् ) इतः विधिलिङि प्रथमपुरुषैकवचने साधुरूपं 'विश्वस्यात्' इत्यस्ति।

यतः प्रक्रियायाम् "अदिप्रभृतिभ्यः शपः (2/4/72)" इत्यनेन शप्-विकरणस्य लोपःक्रियते चेत् यासुट् इत्यस्य यकारस्य इय् आदेश एव न भवति यतः " अतो येयः" (7/228) इत्यस्य सूत्रस्य प्रसक्तिर्नास्ति। यदि प्रक्रियायां शप्-विकरणस्य लोपो न भवति तदैव अतो येयः इत्यनेन यासुट् - इत्यस्य इय् - इत्यादेशं कृत्वा ततः विश्वसेत् इति रूपं साधयितुं शक्यते। ततः प्रयोगस्यास्य समानार्थमनेके वैयाकरणाः गणकार्यमनित्यमस्तीत्याहुः। तन्मते विकरणविधानम्, तस्य लोपश्य अनित्योऽस्ति, प्रक्रियायां कुत्रचिन्नैव भवितुमर्हति। अयं पक्षः स्वीक्रियते चेत् "वि+श्वस्" इत्यस्य विधिलिङ्लकारस्य प्रथमपुरुषैकवचनस्य प्रक्रियायां शप् - विकरणलोपम् अकृत्वा विश्वसेत् इत्यस्य साधुत्वं प्रदर्शयितुं शक्यते। एतं पक्षं मनसि निधाय श्रीमन्नागेशमहाशयेन परिभाषेन्दुशेखरे " गणकार्यमनित्यम्" इति परिभाषा काचित् प्रस्तुता। अनया परिभाषया गणकार्यस्य अनित्यत्वं विज्ञाय "विश्वसेत् " सदृशाः प्रयोगाः सिद्धयन्ति किन्तु इयं परिभाषा भाष्यकृता कुत्रापि न पाठिता, ततः नागेशमहाशयैरपि परिभाषासौ न स्वीक्रियते। अर्थात् भाष्यकृतः नागेशमहाशयस्य च मतेन " विश्वसेत्" एवं सदृशाः प्रयोगा अपाणिनीयाः / आर्षप्रयोगा एव ज्ञातव्याः।

• **अत्र प्रश्नः –**

कर्त्तरि शप् (3/1/68) इत्यनेन शपि तस्य लुकः किं प्रयोजनम्? अथवा मूलरुपेणैव शपो विधानं न क्रियते चेत् को दोषः?

• **अत्रोत्तरम् –**

शप् - इति विकरणविधानात् परं शपो लुक् क्रियते चेददादिगणस्य धातवो लुग्विकरणत्वं लभन्ते । अत एव लुग्विकरणालुक्विकरणयोः अलुग्विकरणस्य इति परिभाषया गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु (2/4/77) इत्यत्र केवलं भ्वादिगणस्य " पा" धातोरेव ग्रहणं भवति । अदादिगणस्य पा-धातोर्न । अनेनैवादादिगणस्य " पा " इति धतोः लुङि अपासीत् इतीष्टरूपं सिद्ध्यति । यदि अदिप्रभृतिभ्य: शप्-प्रत्ययो नैव अकत्वा, तस्य लोपोऽपि न क्रियते , तर्हि अदादिगणस्य धातवः लुग्विकरणत्वं न लभेरन् । अस्यां स्थितौ पा-धातुविषये गतिस्थाघुपाभुभ्यः सिचः परस्मैपदेषु (2/477) इत्यस्य प्राप्तिस्स्यात् । अनेन अपात् इति अनिष्टरूपं सिद्ध्येत । तस्माद्धि अदादिगणस्य धातूनां विषये शपः विधानं कृत्वा तस्य लुक् अपि क्रियते । इति तदर्थमेव लुग्विधानमृजुप्राज्ञे वर्तते ।

**• प्रबन्धसारः –**

एतावता पर्यालोचनेन ज्ञायते यत् उपाध्यायश्रीसहजकीर्त्तिप्रणीतम् " अदादेरवो लुक् ( 788 ) , इति सूत्रं सर्वथा पाणिनीयम् "अदिप्रभृतिभ्यः शपः" इति सूत्रमनुसरति हि । अतः पाणिनीय-व्याकरणज्ञानादृते ऋजुप्राज्ञीयं व्याकरणं ज्ञातुं नैव शक्यत ।

**• उपसंहृतिः-**

**अर्थप्रवृत्तितत्त्वानां शब्द एवं निबन्धनम् ।**
**तत्त्वावबोध: शब्दानां नास्ति व्याकरणादृते ॥**[7]

व्याकरणस्य महात्म्यमवर्त्तत, वर्त्तते , वर्तिष्यते च । तपस्तामुत्तमं तपः व्याकरणम् । यस्माद्दृष्टादृष्टफललाभो भवति। महाभाष्य-कृतापि भूयः व्याकरणस्य प्रशंसाकारि ।शब्दब्रह्मणा सह तादाम्यला-भस्योपायरूपेण । यो हि वाग्योगविद् वैयाकरणः स प्रकृतिप्रत्ययादि-रुपविभागं प्राप्तया वैखर्या वाचः प्रकृतिभूतां प्रतिभाख्यं समनुगच्छति । वाचां स्वरव्यञ्जनदोषाणामपि मलरूपाणां व्या-करणेन चिकित्सा क्रियते । यथा शरीराणां रोगाणाम् आयुर्वेदचि-कित्सया क्रियते । व्याकरणं वै मोक्षस्य द्वारम् ।
मुमुक्षूणां राजपद्धातिश्चोक्ता -

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।**
**इयं सा मोक्षमार्गाणामजिह्वा राजपद्धतिः ॥**[8]

तस्माद्धि सर्वे नरः शब्दानुशासनमधीयतामित्याशय आचार्याणाम् ।

**➢ सङ्केताक्षरसूची -**

वा. प ब्रह्म. का - वाक्यपदीयम् ब्रहामकाण्ड
म.भा,प.आ - महाभाष्ये पस्पशाह्निकम्
ऋजु.प्रा. - ऋजुप्राज्ञव्याकरणम्
पाणि.अ - पाणिनीयाष्टाध्यायी
काशि. - काशिका
वा.प.आग.का - वाक्यपदीयम् आगमकाण्ड

**➢ परिशीलनीयग्रन्थसूची**

१. अष्टाध्यायी पं. ईश्वरचन्द्रः, चौखम्बा पब्लिशर्स
२. काशिकान्यासपदमञ्जरी संस्कृत एवं भावबोधिनी 'हिन्दी टीका, डॉ. जयशङ्कर लाल त्रिपाठी, तारा पब्लिकेशन्स, वाराणसी
३. काशिकावृत्तिः न्यासपदमञ्जरीसहिता, डॉ. नारायणमिश्रः, रत्ना पब्लिकेशन्स, वाराणसी
४. न्यास इत्यपरनामधेया काशिकाविवरणपञ्चिका
५. पदमञ्जरी, आचार्य पुल्लेल रामचन्द्रुडु, संस्कृत अकादमी, उस्मानिया विश्वविद्यालयः. हैदराबाद्
६. महाभाष्यम् प्रदीपोद्योतराजलक्ष्मीटीकासहितम्, गुरुप्रसादसा-दशास्त्री, प्रतिभा प्रकाशन, नई दिल्ली
७. महाभाष्यम् प्रदीपोद्योतसहितं छायाटीकोपेतञ्च. चौखम्बा संस्कृतप्रतिष्ठान, वाराणसी
८. वैयाकरणभूषणम्, डा. विद्यानिवास मिश्रः, भारतीयविद्या-प्रकाशन, वाराणसी
९. वैयाकरणभूषणसारः, चौखम्बा संस्कृतप्रतिष्ठान, वाराणसी
१०. व्याकरणशास्त्र का इतिहास भाग १, आचार्य युधिष्ठिरमीमांसकः

**सन्दर्भ ग्रन्थः**

1. वा. प ब्रह्म. का १४
2. म.भा,प.आ
3. ऋजु.प्रा.788
4. पाणि.अ.२.४.७२
5. काशिका.२.४.७२
6. पाणि.अ.3/1/68
7. वाक्यपदीयम्,आगमका
8. (वाक्यपदीयम् )